# શ્રીતાત્પર્યબોધઃ

shrItAtparyabodhaH

sanskritdocuments.org

March 17, 2018

# shrItAtparyabodhaH

# શ્રીતાત્પર્યબોધઃ

## Sanskrit Document Information

Text title : tAtparyabodhaH

File name : tAtparyabodhaH.itx

Category : vishhnu, krishna, puShTimArgIya

Location : doc_vishhnu

Author : mAdhavadAsa

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# શ્રીતાત્પર્યબોધઃ

(શ્રીતાત્પર્યબોધગ્રન્થાંશઃ)
શ્રીમચ્છ્રીવરગોકુલાયતિવિલોલાક્ષીકદમ્બામ્બુજ-
શ્રેણીસન્મકરન્દપાનકુશલ શ્રીષટ્પદાલીશ્વરઃ ।
સ્વીયાનાં હિ સતામનન્યમનસાં સમ્પૂરયન્ કામનાઃ ।
સોઽયં શ્રીવરગોકુલે વિજયતે શ્રીગોકુલેશઃ સદા ॥ ૧॥

નત્વા વૈ ચરણામ્બુજં સુસુખદં ધ્યેયં સતાં સર્વદા
પદ્માગારધરેન્દિરાભૃઙ્ગભવાનીનાદ્યગમ્યં વરમ્ ।
શ્રીશ્રીગોકુલનાયકસ્ય વિમલં તાત્પર્યબોધં કરો-
તીમં વલ્લભપાદપદ્મસુમનાસ્તસ્યાજ્ઞયા માહવઃ ॥ ૨॥

એકસ્મિન્ સમયે સ્થિતૌ શુભમતી કૌચિજ્જનૌ ગોકુલે-
શાઙ્ઘ્ર્યમ્બૂદ્ભવયુગ્મસક્તમનસૌ શ્રીવલ્લભાતિપ્રિયૌ ।
શ્રેષ્ઠો વલ્લભદાસ એવ ચ તયોર્વૈ કૃષ્ણદાસોઽપરઃ
પપ્રચ્છાથ વિચાર્ય પ્રશ્નમમલ તં શ્રેષ્ઠભક્તં સુધીઃ ॥ ૩॥

કૃષ્ણદાસ ઉવાચ-
શ્રેષ્ઠસ્ત્વં ભક્તવર્યેષુ હરેર્વલ્લભદાસ હિ ।
દયાસિન્ધો જ્ઞાનસિન્ધો કૃપાં કુરુ મયિ પ્રિય ॥ ૪॥

શ્રીવલ્લભાઙ્ગચિહ્નાનિ દૃશ્યમાનાનિ સર્વતઃ ।
પૃચ્છામ્યાશુદ્ધભાવેન કથયસ્વ સુબુદ્ધિમન્ ॥ ૫॥

દ્વિજરૂપધરઃ સાક્ષાદ્વલ્લભઃ પુરુષોત્તમઃ ।
જયત્યતિશયં ભૂમૌ સ્વીયાનાં મુદમાવહન્ ॥ ૬॥

તુલસીકાષ્ઠસમ્ભૂતાં કણ્ઠે માલાં ધરત્યસૌ ।
તિલકં સાન્તરાલં ચ રદાનમ્બુદસન્નિભાન્ ॥ ૭॥

ઉદરે ચિહ્નમાનીલં વામભાગે સુવર્તુલમ્ ।

બહૂપવીતકં કણ્ઠે સવ્યભાગે તુ સૂત્રયમ્ ॥ ૮॥

શ્રોત્રપ્રવરયોરઙ્ગીકારસ્તત્ર સુલક્ષ્મ હિ ।
મકરાકારમારક્તં તત્ર કિં કારણં પ્રિય ॥ ૯॥

વેદાદિગ્રહણં કસ્માત્ સન્ધ્યાયાસ્તુ વિશેષતઃ ।
ચક્રાદિગ્રહણં કસ્માત્ કુણ્ડલે ચક્રસન્નિભે ॥ ૧૦॥

કૃષ્ણઃ શ્યામસ્ત્વયં ગૌરસ્તત્ર કિં કારણં પ્રિય ।
પુરાણપુરુષઃ સાક્ષાદ્વલ્લભો દ્વિજરૂપભાક્ ॥ ૧૧॥

વિભુર્માનવરૂપી ન તત્ર કિં કારણં સખે ।
શયનં દિવસે ભૂમાવાચારાચરણં મહત્ ॥ ૧૨॥

અતદન્યચ્ચ સર્વં મે પૃચ્છતે કૃપયા સખે ।
કથનીયં ત્વયા સ્વસ્થબુદ્ધિતઃ શ્રોતુમિચ્છતે ॥ ૧૩॥

ત્વં શ્રીવલ્લભપાદાબ્જાસક્તોઽસિ હરિવલ્લભઃ ।
ત્વત્પાદાબ્જાશ્રિતં માં હિ કથયસ્વ કૃપાનિધે ॥ ૧૪॥

ઇતિ તસ્યોદિતં શ્રુત્વા વલ્લભઙ્ઘ્રિસરોરુહમ્ ।
ધ્યાત્વા ચોવાચ વચનં તં શ્રીવલ્લભસેવકઃ ॥ ૧૫॥

ઇતિ શ્રીમાધવદાસવિરચિતઃ શ્રીતાત્પર્યાર્થબોધઃ ગ્રન્થઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*shrItAtparyabodhaH*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*